# શ્રીરામસૌન્દર્યલહરી

Shri Rama Saundarya Lahari

sanskritdocuments.org

July 4, 2018

# Shri Rama Saundarya Lahari

# શ્રીરામસૌન્દર્યલહરી

## Sanskrit Document Information

Text title : Rama Saundarya Lahari

File name : rAmasaundaryalaharI.itx

Category : raama, laharI

Location : doc_raama

Author : Sarvabhauma. Sanskrit commentary (in the scan) is by Chenna Bhatta in 14th century

Description/comments : Incomplete text and commentary

Latest update : July 4, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

July 4, 2018

*sanskritdocuments.org*

# શ્રીરામસૌન્દર્યલહરી

યદ્દીનેષુ ધરાસુતારમણ તે નેત્રદ્વયં જાત્વપિ
    પ્રાન્તેક્ષાકનિતાખિલાર્ત્યપગમદ્ધ્યાનાદ્યકુર્વત્સ્વપિ ।
નિત્યં પ્રેમદયોર્જિતં નિવિશતે તત્સન્તતં ભક્તિતઃ
    ત્વત્સેવૈકહૃદઃ કથં ન વિષયીકુર્યાત્તથા નઃ કૃશાન્ ॥ ૧॥

મુગ્ધં રામ તવાનનં સહૃદયં લોકસ્ય સમ્પશ્યતો
    નેત્રં વિસ્તૃતપક્ષ્મવિભ્રમમિતો નાપૈતિ લક્ષ્મ્યા યયા ।
શીતાંશું વિમલં ન સા બહુશરદ્રાકોદ્ભવાસ્વેકદા
    શ્રીષ્વપ્યાર્ય ગતાસુ તાદૃશિ મનાગ્લક્ષ્યેત ભિન્ને કિમુ ॥ ૨॥

ચન્દ્રં તવાનનસમં દ્રુહિણો વિધાતુ-
    મેકૈકયા પ્રતિદિનં કલયા યુનક્તિ ।
પર્વણ્યવેક્ષ્ય સ તયોર્વિષમત્વમુચ્ચૈ-
    રાદર્શમાક્ષિપતિ તા હિ તથાધુનાપિ ॥ ૩॥

રામાક્ષિ તે સદૃશતાં કમલાનિ દૃગ્ભ્યાં
    ગન્તું જલેષુ વરદં સમુપાસતેઽર્કમ્ ।
તત્કાન્તિલેશમનવાપ્ય તતોઽપિ રાત્ર્યાં
    શુષ્યન્તિ મીલનમિષાદતિદુઃખિતાનિ ॥ ૪॥

રમ્યં દૃશૌ જગતિ રાઘવ તે સિસૃક્ષુ-
    ર્ધાતાબ્જકોટિમસૃજત્કરપાટવાય ।
સૃષ્ટ્વાથ તે સ તુ તયોરનુરૂપમેકં
    લબ્ધું પુનઃ સૃજતિ પદ્મકુલં ન લેભે ॥ ૫॥

સ્નિગ્ધાનિ રામ નવ સાન્દ્રતરાણિ ભાન્તિ
    પક્ષ્માણિ નીલનિબિડાનિ દરોન્નતાનિ ।
પ્રાયેણ લગ્નનયનામ્બુરુહપ્રવેક-
    નીલાન્યનુક્ષણનિમેષકુલૈરિવ સ્વૈઃ ॥ ૬॥

નીલોત્પલાદહનિ પદ્મકુલાદ્રજન્યાં
    લક્ષ્મીરપૈતિ કુત ઇત્યવધાર્ય વેધાઃ ।
ત્વન્નેત્રયોર્વિરચિતામનપાયિનીં તાં
    કર્તું ચકાર નૃપ પક્ષ્મમિષેણ વપ્રામ્ ॥ ૭॥

આપ્રાન્તમાયતનતે રઘુવંશચન્દ્ર
    દેવ ભ્રુવૌ નયનયોર્જિતમાર ભાતઃ ।
સઞ્જાતરક્તનલિનજ્વલદગ્રભાગે
    વલ્લ્યાવિવાદ્ભુતતરે જગતીહ કેઽપિ ॥ ૮॥

મુગ્ધાઙ્ગનાજયસિસાધયિષોદયેન
    સ્વપ્રાર્થિતેન મદનઃ કમલાસનેન ।
તં સંહિતં સુમુખ માદ્યતિ નેત્રકોણં
    ત્વદ્ભૂધનુષ્યુપરિપક્ષ્મગુણેઽધિગત્ય ॥ ૯॥

દીર્ઘં વિશાલમલમુત્તરકોસલેન્દ્ર
    મધ્યે વિશેષકવિશોભ્યલિકં તવાચ્છમ્ ।
ત્વદ્ધર્ષ્મનિષ્કુટતટેષુ સદા ચરન્ત્યા
    વિશ્રાન્તિપીઠમિવ રાજતિ રૂપલક્ષ્મ્યાઃ ॥ ૧૦॥

રેખાત્રયેણ તવ રામ લસલ્લલાટં
    તિર્યગ્વિભાતિ નનુ સૂક્ષ્મતરેણ મધ્યે ।
સમ્ભાવિતર્ધવદનોજ્જ્વલતાપ્રવાહ-
    વેગાહિતાનભિહતાયતસત્રિનિમ્નમ્ ॥ ૧૧॥

તીક્ષ્ણોન્નતાગ્રમહિમાંશુકુલાવતંસ
    ઘ્રાણં મનાક્ તવ વિજૃમ્ભિતચમ્પકશ્રિ ।
સૌન્દર્યનિર્ઝરચરદ્વનિતાક્ષિમત્સ્યા
    નાદાતુમત્ર બડિશં નિહિતં નુ ભાતિ ॥ ૧૨॥

કાકુત્સ્થ તે સુમનસાં ચયમબ્જયોનિ-
    ર્નાસાં તતાન તિલપુષ્પસમાં ગૃહીત્વા ।
તન્નિર્ગતસ્ય પવનસ્ય યતઃ સ ગન્ધો
    યઃ સ્યાત્તરામુપવને ચરતો વસન્તે ॥ ૧૩॥

ઓષ્ઠોપરિ સ્ફુરદનઙ્ગસમાઙ્ગ નિમ્નમ્

ગાઢં તવોલ્લસતિ દાડિમબીજદઘ્નમ્ ।
ત્વામેવ ચેતસિ શુચિં સતતં દધત્યાઃ
સ્વપ્નોપભોગદશનક્ષતમઙ્ગનાયાઃ ॥ ૧૪॥

નિર્માય તે મૃદુતયોત્પલભાસ્વરોષ્ઠં
ભૂયઃ પરીક્ષિતુમિમં ચતુરાનનેન ।
તસ્મિન્નસાન્દ્રનિહિતાગ્રકનિષ્ઠિકાયા
વિદ્યોતતે પદમિવોષ્ઠતલોર્ધ્વનિમ્નમ્ ॥ ૧૫॥

લક્ષ્યેત રામ તવ ચેદધરઃ કવીન્દ્રૈઃ
કથ્યેત વિદ્રુમગણેષુ કથં તથા શ્રીઃ ।
જ્ઞાયેત ચેત્સ મધુરોઽતિશયઃ સુધાયાં
સ્પૃશ્યેત ચેદભિનવે મૃદુતા શિરીષે ॥ ૧૬॥

બિમ્બૈઃ ફલૈર્જગતિ યત્કવિનાધરાણાં
રામોપમામધરબિમ્બપદં પ્રયુક્તમ્ ।
તત્તેઽધરસ્ય ગુણવાચિ કથં ન વા સ્યા-
દત્યન્તતુચ્છમિતિ બિમ્બફલં કિલાતઃ ॥ ૧૭॥

મુક્તાફલાનિ ભુવિ યાન્યતિસુન્દરાણિ
તાન્યેવ ચેદવનિચન્દ્ર નરો દિદૃક્ષુઃ ।
સ્વચ્છં સમુજ્જ્વલ્લમિદં નિશતાગ્રશાલિ
પશ્યેત્સમં સ મસૃણં તવ દ્ન્તજાલમ્ ॥ ૧૮॥

ઊર્ધ્વં સ્થિતેષુ ભરતાગ્રજ તેઽપ્યધસ્તાત્
સત્સ્વમ્બુજાક્ષતનયઃ સમમાનસિદ્ધ્યૈ ।
ચક્રે ધ્રુવં તનુશલાકિકયાન્તરન્ત-
ર્લેખાઃ કૃશા વિરલસન્ધિમિષાદનેકાઃ ॥ ૧૯॥

સૌમિત્રિપૂર્વજ તવાનિશમાસ્યભાજઃ
શુદ્ધાત્વષઃ સુમુખ વાગધિદેવતાયાઃ
તેજો બહિઃ પ્રસરદેવ શરદ્ધવાચ્છ
જ્યોત્સ્નાવિશોભિ તનુહાસ ઇતીર્યતેઽન્યૈઃ ॥ ૨૦॥

મન્દસ્મિતં દશરથાત્મજ તે યદચ્છં
ત્વદ્વક્ત્રપૂર્ણશશિજા નનુ ચન્દ્રિકા સા ।
આલોકતઃ સરસતાં યદમુષ્ય ચન્દ્ર-

કાન્તાનનં ભજતિ હિ પ્રમદાજનસ્ય ॥ ૨૧॥

સઙ્ક્ષિપ્તશબ્દમપિ દુર્ગ્રહમર્થજાલૈઃ
યદ્રોચતે વિબુધ તે વચનં પશુભ્યઃ ।
તન્મન્દહાસશરદુદ્ભવચન્દ્રિકોષ્ઠ
પીય્યૂષસઙ્ગજમહો મધુરત્વમસ્ય ॥ ૨૨॥

આદીયતે સ્મ સુત કોસલરાજપુત્ર્યાઃ
વાગ્ભ્યોઽનુ તે કિસલયૈર્મૃદુતા નવીનૈઃ ।
આહોસ્વિદત્ર કિમુ સુસ્મિત વૈપરીત્યં
વાક્તાં તવાપુરુત તાનિ નુ યન્ન ભેદઃ ॥ ૨૩॥

સમ્પશ્યતાં ગુણાગણામ્બુનિધે ખનીં નઃ
વૃત્તાં સ્થિતાં ભવતિ તે ચુબુકાદધોઽત્ર ।
ધાત્રોન્નમય્ય મુખમેતદવેક્ષિતું તે
દત્તાદિમાઙ્ગુલિતલાગ્રખનીતિ શઙ્કા ॥ ૨૪॥

આદર્શસામ્યમનુચિન્ત્ય નિષેધયામો
ગણ્ડદ્વયસ્ય તવ રામ કવીન્દ્રબદ્ધમ્ ।
અસ્મિન્યથાઽભિમુખસંસ્થિતમચ્છમેવ-
મન્યત્ર ન પ્રતિફલત્યુપમાનમાત્મા ॥ ૨૫॥

મન્દસ્મિતસ્ય વિશદૈસ્તવ તૈર્મહોભી
રામાભિતો વિતતમચ્છકપોલયુગ્મમ્ ।
સાન્દ્રં સરોરુહભુવા પરિતો વિલિપ્તં
શુદ્ધામૃતસ્ય કણિકાભિરિવાદ્ય ભાતિ ॥ ૨૬॥

ઊર્ધ્વસ્ફુરન્મકરકુણ્ડલભાવિલિપ્ત-
રન્ધ્રશ્રુતિદ્વયયુજી તવ રામ નેત્રે ।
સૌન્દર્યનિર્ઝરમહૃદયુગ્મતોઽલં
તીરે ઝષાવિવ તતઃ પતિતૌ ચલન્તૌ ॥ ૨૭॥

શ્રીરામ કામસમ વૃત્તતયા ત્વદીયં
કર્ણદ્વયં પ્રતિનિધીકૃતશષ્કુલીકમ્ ।
દોર્મૂલદેશયુગલે વિનિહીર્ષયાઽઽભા-
મુત્તભ્ય કુણ્ડલયુગસ્ય શનૈરુપૈતિ ॥ ૨૮॥

અન્તર્જનસ્ય તવ યોઽસ્તિ ગુણાઢ્ય રાગઃ
    સ્થાતું શશાક ન મુહુઃ સ સમેધૃમાનઃ ।
શિષ્ટસ્તતઃ શ્રવણરન્ધ્રયુગાદુપાસ્તે
    નિર્ગત્ય તત્કનકકુણ્ડલયુગ્મરૂપાત્ ॥ ૨૯॥

અઙ્ગસ્ય યસ્ય ભુવિ યા કમનીયભૂષા
    સા નિર્મલાપિ યદિ તચ્છ્રિયમાતનોતિ ।
ગણ્ડપ્રભાવ્યતિકરાદિવ કર્ણભૂષે
    કાષ્ઠામુપેત્ય તુ વિભૂષયતસ્તવાસ્યમ્ ॥ ૩૦॥

શ્રીરામ તે સદય લોચનયોરુપાન્તે
    રાગો વિનિર્જિતનવાઙ્કુરકાન્તિદર્પઃ ।
મન્યે તમદ્ય મનુજેષુ નિજાનુરાગં
    દૃગ્ભ્યાં સ્વતઃ પ્રકટિતં પ્રચુરઞ્જનાય ॥ ૩૧॥

આતામ્રકૃષ્ણસિતનેત્રયુગાત્સ્રવન્ત્યો
    ભાસો વિભાન્તિ બહુવર્ણમનોજ્ઞરૂપાઃ ।
પૃજ્યાગ્રતસ્તવ મુદે ગગનાન્તરાલે
    સિદ્ધેન રામ રચિતા ઇવ ચિત્રલેખાઃ ॥ ૩૨॥

ભૂતેષુ જન્મસુ ન યૈર્બહુ ચેદકારિ
    પુણ્યં ન તેષુ પુરુષોત્તમ તં કટાક્ષઃ ।
ઇષ્ટાર્થદઃ સ તુ સુધારસપૂરતુલ્ય-
    સ્તાપં હરન્પરમ માં વિષયીકરોતિ ॥ ૩૩॥

પશ્ચાત્કૃતસ્ય પશુના બુધ ચામરસ્ય
    મૂર્ધ્નિ ત્વયાઽદ્ય વિધૃતસ્ય સુકેશરાશેઃ ।
નેહેઽસ્મિ સામ્યમનુવર્ણયિતું સુગન્નુ
    યાનઞ્જનસ્ય વિમતેરપહાસ્યતાયાઃ ॥ ૩૪॥

દૃગ્ભ્યાં સરોરુહરુચિક્ષતિકૃત્સુધાવ-
    દ્બિમ્બાધરેણ હસિતેન સચન્દ્રિકં ચ ।
પદ્મેક્ષણાનનસુધાકરમણ્ડલં તે
    નઃ પશ્યતાં શશિસમીક્ષણતો વિરક્તિઃ ॥ ૩૫॥

આસ્યં ત્રિલોકમપિ દાશરથે સ્ફુટાક્ષં
    વિસ્મેરમાવહત ઉજ્વલતાગુણસ્ય ।

વિશ્રામભૂરુહમનાપ્ય ન પાપકૃત્કઃ
    જઙ્ઘાલમેણધરદર્પભિદાકૃતીદમ્ ॥ ૩૬॥

ઉન્નિદ્રમર્ધમહિમાંશુમહોભિરર્ધ-
    નિદ્રાયિતં ચ કમલં વિધુનૈકદા ચેત્ ।
તેનાતિસુન્દર તવૈવ સમીક્ષ્યેત
    ગ્રીવા તુ સુન્દરતયા રહિતો હિ કમ્બુઃ ॥ ૩૭॥

આશ્લેષસક્તહૃદયેન યદા યદા તે
    કણ્ઠો વ્યલોકિ સુયશો વનિતાજનેન ।
રાગસ્તદીયમનસોઽત્ર તદા તદાલં
    સક્તસ્તતોઽસ્તિ નુ ભવાનતિરક્તકણ્ઠઃ ॥ ૩૮॥

સત્વેન રામ મિલિતેન સહાતિરિક્તૈ-
    સ્તૈરામણીયકરસૈઃ સ્વકરોપપીડમ્ ।
તે પિણ્ડિતેન રચિતસ્ય ગલસ્ય તિર્ય-
    ગાકુઞ્ચનાત્રિવલિ વિશ્વસૃજોદગાત્કિમ્ ॥ ૩૯॥

લોકત્રયસ્ય વિજયે મદનેન સાક્ષા-
    દ્ધઃ પૂર્યતે મુસ્વમરુદ્ભિરનન્યસાધ્યે ।
શઙ્ખઃ સ એવ તવ કણ્ઠમિષેણ રામ
    હારૈરનર્ઘતરલૈરમલૈર્વિભાતિ ॥ ૪૦॥

સ્કન્ધૌ તવામરનિભાચ્છસુવર્ણકર્ણ
    ભૂષાપ્રભારસઝરસ્ય કપોલયુગ્મમ્ ।
આક્રમ્ય સમ્પ્રવહતઃ પૂનરપ્યધસ્તાત્
    વ્યૂઢત્વમાપતુરિવાધરણાય કામમ્ ॥ ૪૧॥

સૃષ્ટ્વા વિધિસ્તવ શરણ્ય વિશાલમંસં
    મેને પુનર્બહુવિશાલતયા વિહીનમ્ ।
જત્ર્વઙ્ગમસ્ય સમવાયિ ચકાર સોઽત-
    સ્તસ્માન્ન સમ્પ્રતિ વિભો વયિ દૃશ્યતે તત્ ॥ ૪૨॥

સઙ્ખ્યાવતાં જગતિ રામ ભુજોત્તમાઙ્ગ-
    મંસં વદન્તિ નિકરાઃ પ્રથિતોરુકીર્ત્યા ।
તેનાહમેવ ભુજતશ્ચ કિલોત્તમાઙ્ગ-
    મિત્યુન્નતિં કિમભજન્નુ તવાંસયુગ્મમ્ ॥ ૪૩॥

શુદ્ધા પ્રભા બહુગુણૈરમલં સ્વહાર-
 માચ્છાદ્ય રામ નિબિડોપરિસંસરન્તી ।
અત્યુન્નતાદિવ તવાંસગિરેર્ગલન્તી
 સૌન્દર્યહૃદ્યરસજા લહરી વિભાતિ ॥ ૪૪॥

યત્તે નરેન્દ્ર સકલાનનિવારિતાભ્યો
 બાહૂ જનાનુપનતાનવતો વિપદ્ભ્યઃ ।
ગમ્ભીરસત્ત્વગુણયુક્તતયા તતોઽમૂ
 સદ્વૃત્તતાં નુ કિમવાપતુરેવ તૌ દ્વૌ ॥ ૪૫॥

સઙ્ગ્રામમૂર્ધ્નિ રિપુષુ સ્વબલેન સાકં
 પ્રાણાન્વિહાય પતિતેષ્વથવા દ્રુતેષુ ।
આવેશતસ્તવ ભુજૌ વિરતિં ભજેતે
 દાર્ઢ્ય યતઃ સરલતા ન તયોઃ શિલાયાઃ ॥ ૪૬॥

યાવત્પ્રભો ન ભુજયોસ્તવ સત્ત્વમન્તઃ
 પ્રાપ્નોતિ માનમધુનાસ્તિ તદૈવ તાવત્ ।
તસ્માદ્ધ્રુવં દૃઢતયા દરમપ્યભિન્નૌ
 નુન્નૌ ન તેન શિથિલત્વમિમૌ લભન્તે ॥ ૪૭॥

મધ્યેઽભિરામ તવ શૈશવસમ્પ્રયુક્તં
 પીનત્વમદ્ય પરિગૃહ્ય ચ યૌવનેન ।
બાહોર્ન્યધાયિ નનુ તદ્યદનુપ્રવેશે
 પીને તનુત્વમતનુત્વમપીનયોશ્ચ ॥ ૪૮॥

સૃષ્ટ્વા મિથસ્તવ ભુજૌ સદૃશૌ વિધાતા
 ભૂયઃ પરીક્ષિતુમનુત્તમ તત્સમત્વમ્ ।
આકર્ષતિ સ્મ દૃઢમેવ તતોઽતિદૈર્ઘ્ય-
 માજાનુ રામ સમજન્યનયોસ્તુ નૂનમ્ ॥ ૪૯॥

પારાવારપયોવિશોષણચણૈર્બાણૈર્નિહત્યાશરાન્
 ક્લિષ્ટાન્સાધુજનાન્નરક્ષ કૃપયા ધર્મઞ્ચયોઽસ્થાપયત્ ।
સોઽયં શ્રીજનકાત્મજાસહચરો નિશ્શ્રેયસાધીશ્વરઃ
 ક્ષેમસ્થૈર્યજયાનભીપ્સિતમથો ભદ્રઞ્ચ દદ્યાત્સતામ્ ॥

ઇતિ શ્રીરામસૌન્દર્યલહરી સમાપ્તા ।

॥ શુભમસ્તુ ॥

Incomplete composition by sArvabhauma

Encoded and proofread bu Sunder Hattangadi sunderh at hotmail.com

---

*Shri Rama Saundarya Lahari*
pdf was typeset on July 4, 2018

Please send corrections to *sanskrit@cheerful.com*